अस्मद्गुरोर्भगवतोऽस्य दयैकसिन्धो रामानुजस्य चरणौ शरणं प्रपद्ये ॥
वाधूलश्रीनिवासार्यसूनुं तत्पादसंश्रयम् ।
श्रीमहार्यमहं वन्दे कल्याणगुणभूषणम् ॥

श्रीमदादिनारायणस्यांशावतारो भगवान् श्रीवेदव्यासमहामुनिः सर्वलोकोपका(रा)र्थं पूर्वस्मिन् कल्पे सोमकासुरहरणेनान्योन्यसंमिश्रमाणान् वेदान् ऋग्यजुस्सामाथर्वरूपेण विभागं कृत्वा तद्वेदार्थान् पुराणेतिहासरूपेण प्रकटीकृतवान्। तेषु पुराणेषु षट् पुराणानि सात्त्विकानि। षट् पुराणानि राजसानि। षट् पुराणानि तामसानि अभवन्। तथा पद्मपुराणे—

वैष्णवं नारदीयं च तथा भागवतं शुभम् ।
गारुडं च तथा पाद्मं वाराहं शुभदर्शने ॥

* * * *

मुक्ताः परमपदवासिनः। केवलाः कैवल्यसाधकाः मुमुक्षवः आचार्याश्रितास्सन्तस्तदुपदेशेन प्रपत्तिनिष्ठाधिकारिणः। बद्धाः अविद्यायुक्ताः अतएवापक्काः। एतेषु मुमुक्षुः पक्क इत्युच्येत। बद्धः अपक्क इत्युच्यते। एतेषु पक्कः मुमुक्षुः स्वधर्मं त्यक्त्वा हरेः चरणाम्बुजं भजन् शरणं गत्वा परमपदं प्राप्नोति।

End:

अस्यां शरणागतरत्नमालिकायां प्रपत्तियोगवैभवव्याख्याने कृते सति तत्रतत्र ग्रन्थसन्दर्भेण सूक्ष्मरूपेण प्रपन्नप्रसादशेषवैभवं(वः) चार्थपञ्चकज्ञानं चार्चिरादिमार्गं च पञ्चनिष्ठास्वरूपं च तत्त्वत्रयं च दशविधवैष्णवस्वरूपं च गुरुप्रभावं(वः) च देवतान्तरादिपञ्चत्यागलक्षणं च गृहस्थसंन्यासलक्षणं च रहस्यत्रयार्थं(र्थः) च ज्ञानभक्तिवैराग्याणि च श्रीवैष्णवपादरजोवैभवं च श्रीपादतीर्थवैभवं च श्रीवैष्णवाचारं(रः) च प्रपन्नाचाराश्चैकान्तिनामाचाराश्च परमैकान्तिनामाचाराश्चात्याश्रमस्वरूपं चावधूताश्रमस्वरूपं च विशदीकृतम् ॥

श्रीमद्रामानुजमुनिचरणारविन्दध्यानाल्लब्धज्ञानः श्रीकन्दालभावनाचार्याभिधानोऽहमेतां शरणागतिरत्नमालिकां श्रीमहाभागवतपुराणे आलोड्य श्रीवेदव्यासमुनिना यथाकृतं तथैव कृतवानस्मि ॥

एषा शरणागतरत्नमालिका श्रीवैष्णवानां प्रपन्नानामनुदिनमनुसन्धेया। अस्याः अनुसन्धानमात्रेणास्तु ते इत्युक्तपारमार्थिकशरणागतनिष्ठां प्राप्य परमैकान्ती भूत्वा भगवद्दिव्यश्रीपादारविन्दानन्दं लब्ध्वा देहान्ते परमपदं प्राप्नोति। तस्मात्प्रपन्नानामेषा शरणागतरत्नमालिकाऽनुदिनमनुसन्धेया ॥

बाधूलभावनाचार्यतनयं गुणशालिनम् ।
श्रीनिवासाङ्घ्रिसद्भक्तं श्रीरङ्गगुरुमाश्रये ॥

R. No. 1776.

Palm-leaf. 16⅜ × 1½ inches. Foll. 201. Lines, 7 in a page. Grantha. Much injured.

Presented in 1915-16 by M.R.Ry. N. Vēṅkaṭarāma Śāstri of Vayalūr, Tanjore district.

ब्रह्मसूत्रभाष्यव्याख्या— शारीरकन्यायनिर्णयः.

BRAHMASŪTRABHĀṢYAVYAKYĀ : ŚĀRĪRAKANYĀYANIRṆAYAḤ.

By Ānandajñāna, disciple of Śuddhānanda. Same work as that described under No. 4683 of the D.C.S. MSS. Vol. IX, wherein see for the beginning.

Wants the beginning in the third Sūtra of the second Pāda in the third Adhyāya and ends in the fourth Adhyāya.

End:

समन्वयाविरोधसाधनफलानां साकल्येनोक्तत्वात् वक्तव्यानवशे(षात्परिसमा नपमुचितामिति भावः) ॥

(व्याख्या सङ्ख्याततर्ककक्रचचयरयत्नतदुस्तर्कशङ्का-
शङ्काव्याजप्रकारप्रसरणसमतावस्तुतत्त्वं श्रयन्ती ।
शुद्धानन्दाङ्घ्रियुग्मस्मृतिभरनिभृतप्रौढगाढोक्तिरूढा-
नन्दज्ञानप्रणीता जगति मुदमियं सद्धियां संविधत्ताम् ॥
सन्त्येव बहुलानीह व्याख्यानानि) महाधियाम् ।
व्याख्या तथापि सौख्येन व्याख्यानाय मया कृता ॥

Colophon:

इति श्रीमत्प(रमहंसपरिव्राजकाचार्यश्रीशुद्धानन्दपूज्यपादशिष्य भगव)दानन्दज्ञानकृते श्रीमच्छारीरकभाष्य[विभागे]न्यायनिर्णये चतुर्थस्याध्या(यस्य चतुर्थः पादः ॥ समाप्ता चेयमानन्दगिरि)टीका ॥

R. No. **1777.**

Śrītāla. 8½ × 1¾ inches. Foll. 75. Lines, 9 in a page. Telugu. Slightly injured.

Purchased in 1915-16 from M.R.Ry. N. Vēṅkaṭarāma Śāstri of Vayalūr, Tanjore district.

(*a*) ज्ञानयोगसारः.

JÑĀNAYŌGASĀRAḤ.

Foll. 1*a*—5*a*.

This work purports to give the leading principles of Jñānayōga. It is said to have been revealed by Paramaśiva to Pārvatī.

Contains Paṭalas 22 to 25.

Beginning:

देव्युवाच—

कथमुत्पद्यते वाचा कथं वाचा विलीयते ।
वाचाविनिर्णयं ब्रूहि पश्चात्तत्त्वमुदीरयेत् ॥

ईश्वरः—

अव्यक्तात्प्राण उत्पन्नः प्राणादुत्पद्यते मनः ।
मनस्तूत्पद्यते वाचा वाचा मनसि लीयते ॥

श्रीदेव्युवाच—

आहारं काङ्क्षते को वा भुज्यते पिबते कथम् ।
जाग्रते सुप्यते को वा सुप्तः को वा विबुध्यते ॥

ईश्वर उवाच—

आहारं काङ्क्षते प्राणः भुक्तिश्चैव हुताशनः ।
जाग्रते सुप्यते चित्तं सुप्तं तेजः प्रबोधयेत् ॥

* * * *

Colophon:

इत्युमामहेश्वरसंवादे ज्ञानयोगसारे द्वविंश[ति]: पटलः ॥

End:

सन्तोषेणोपहारेण भक्तिनीराजनेन च ।
ध्यानेनार्घ्यपादे(प्रदाने)न प्रीणाति परमेश्वरः ॥
एतानि सिद्धलिङ्गानि भावनार्चनया सह ।
सन्ध्यासु च समभ्यर्च्य सर्वसिद्धिमवाप्नुयात् ॥

Colophon:

इति ज्ञानयोगसारे महायोगशास्त्रे उमामहेश्वरसंवादे पञ्चविंशति[:] पटलः॥

(*b*) अमनस्कम्.

AMANASKAM.

Foll. 5*a*—13*a*.

Same work as that described under No. 4336 of the D.C.S. MSS., Vol. IX.

Complete.

Foll. 13*b*—15*b* contain Śarīratattva in the Telugu language. Foll. 16*a* to 20*a* contain Ajapāvidhāna. Fol. 20*b* is left blank.

(*c*) अवधूतगीता.

AVADHŪTAGĪTĀ.

Foll. 21*a*—36*b*.

Same work as that described under No. 4543 of the D.C.S. MSS., Vol. IX.

Complete.

The remaining leaves are left blank.

R. No. 1778.

Palm-leaf. $16\frac{7}{8} \times 1\frac{3}{8}$ inches. Foll. 73. Lines, 6 in a page. Grantha. Injured.

Presented in 1915–16 by M.R.Ry. N. Vēṅkaṭarāma Śāstri of Vayalūr, Tanjore district

स्वरसिद्धान्तचन्द्रिका.
SVARASIDDHĀNTACANDRIKĀ.

By Śrīnivāsa. Same work as that described under No. 1023 of the D.C.S. MSS., Vol. II.

Incomplete.

R No. 1779.

Palm-leaf. $14\frac{3}{4} \times 1$ inches. Foll. 81. Lines, 6 in a page. Telugu. Injured.

Presented in 1915–16 by M.R.Ry. N. Veṅkaṭarāma Śāstri of Vayalūr, Tanjore district.

(a) छान्दोग्योपनिषत्.
CHĀNDŌGYŌPANIṢAD.

Foll. 1*a*—5*a*.

Same work as that described under No. 451 of the D.C.S. MSS., Vol. I, Part III.

Contains the sixth Adhyāya only.

(b) बृहदारण्यकोपनिषत्.
BṚHADĀRAṆYAKŌPANIṢAD.

Foll. 5*a*—14*b*.

Same work as that described under No. 633 of the D.C.S. MSS., Vol. I, Part III.

Contains the fourth and the sixth Adhyāyas only.

(c) आरुणिकोपनिषत्.
ĀRUṆIKŌPANIṢAD.

Fol. 15.

Same work as that described under No. 289 of the D.C.S. MSS., Vol. I, Part III.

Wants the beginnin g ; otherwise complete

(*d*) ब्रह्मोपनिषत्.
BRAHMŌPANIṢAD.

Foll 15*b*—16*a*.

Same work as that described under No. 655 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(*e*) जाबालोपनिषत्.
JĀBĀLŌPANIṢAD.

Foll. 16*a*—17*b*.

Same work as that described under No. 470 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(*f*) परमहंसोपनिषत्.
PARAMAHAṀSŌPANIṢAD.

Foll. 17*b*—18*b*.

Same work as that described under No. 598 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(*g*) हंसोपनिषत्
HAṀSŌPANIṢAD.

Foll 18*b*—19*b*.

Same work as that described under No. 841 of the D.C.S. MSS, Vol. I, Part III.

Complete

(*h*) अमृतबिन्दूपनिषत्.
AMṚTABINDŪPANIṢAD.

Foll. 19*b*—20*a*.

Same work as that described under No. 273 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(*i*) नादबिन्दूपनिषत्.
NĀDABINDŪPANIṢAD.

Fol. 20.

Same work as that described under No. 553 of the D.C.S. MSS, Vol. I, Part III.

Incomplete.

(j) बृहज्जाबालोपनिषत्.

BṚHAJJĀBĀLŌPANIṢAD.

Foll. 21*a*—27*a*.

Same work as that described under No. 629 of the D.C.S. MSS., Vol. I, Part III.

Contains Brāhmaṇas one to six only.

(k) क्षुरिकोपनिषत्.

KṢURIKŌPANIṢAD.

Fol 27.

Same work as that described under No. 418 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(l) रहस्योपनिषत्.

RAHASYŌPANIṢAD.

Foll. 28*a*—30*b*.

Same work as that described under No. 749 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(m) संन्यासोपनिषत्.

SANNYĀSŌPANIṢAD.

Foll. 30*b*—31*a*. Fol. 31*b* is left blank.

Same work as that described under No. 811 of the D.C.S. MSS, Vol. I, Part III.

Incomplete.

(n) कौषीतक्युपनिषत्.

KAUṢĪTAKYUPANIṢAD.

Foll. 32*a*—42*b*.

Same work as that described under Nos. 415 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(o) गारुडोपनिषत्.

GĀRUḌŌPANIṢAD.

Foll. 43*a*—44*b*.

Same work as that described under No. 438 of the D.C.S. MSS., Vol. I, Part III.

Complete.

Foll. 45*a*—47*a* contain Āturasannyāsavidhi. Fol. 47*b* is left blank. Foll. 48*a*—49*b* contain Samudrasnānavidhi. Fol. 50 is left blank.

(*p*) अद्वैतमकरन्दः.

ADVAITAMAKARANDAḤ.

Fol. 51.

By Lakṣmīdhara. Same work as that described under No. 4521 of the D.C.S. MSS., Vol. IX.

Complete.

(*q*) दशश्लोकी.

DAŚAŚLŌKĪ.

Fol. 52.

By Śaṅkarācārya. Same wark as that described under No. 4594 of the D.C.S. MSS., Vol. IX.

Complete.

(*r*) शिवगीता.

ŚIVAGĪTĀ.

Foll. 53*a*—81*b*.

Same work as that described under No. 25₁6 of the D.C.S. MSS., Vol. IV, Part II.

Complete.

R. No. **1780.**

Palm-leaf. 16 × 1⅝ inches. Foll. 96. Lines, 9 in a page. Grantha. Much injured.

Presented in 1915-16 by M.R.Ry. N. Vēṅkaṭarāma Śāstri of Vayalūr, Tanjore district.

(*a*) तार्किकरक्षाविवृतिः.

TĀRKIKARAKṢĀVIVṚTIḤ.

Foll. 1*a*—53*b*.

By Harihara. Same work as that described under No. 4197 of the D.C.S. MSS., Vol. VIII.

Wants the beginning and the end in the first Paricchēda.

(*b*) शास्त्रदीपिका.

ŚĀSTRADĪPIKĀ.

Foll. 64*a*—71*a*.

By Pārthasārathimiśra. Same work as that described under No. 4479 of the D.C.S. MSS., Vol. IX.

Contains the third and the fourth Pādas of the seventh Adhyāya.

(*c*) शास्त्रदीपिकाव्याख्या—मयूखमालिका.

ŚĀSTRADĪPIKĀVYĀKHYĀ: MAYŪKHAMĀLIKĀ.

Foll. 72*a*—96*b*.

By Sōmanātha. Same work as that described under No. 4501 of the D.C.S. MSS., Vol. IX, wherein see for the beginning.

Contains the 12th Adhyāya, which wants beginning.

The copyist's name is given as Sadāśivavāddhiyār.

End:

जिज्ञास्य इति । अथातो धर्मजिज्ञासेति स्वरूपप्रमाणसाधनफलैः चतुर्भिः प्रकारैः यो धर्मो जिज्ञास्यत्वेन प्रतिज्ञातः स धर्मः प्रथमादिद्वादशान्तैरध्यायैः (प्रज्ञातः धर्मनिर्णयरूपं) फलं च सिद्धमित्यर्थः ॥

Colophon:

इति श्रीनिट्टलकुलतिलकसूरुभट्टमहोपाध्यायतनूभवस्य वेङ्कटाद्रियज्वगुरुचरणानुजस्य सोमनाथयज्वनः कृतौ शास्त्रदीपिकाव्याख्यायां मयूखमालिकाख्यायां द्वादशस्याध्यायस्य चतुर्थः पादः ॥

अध्यायश्च समाप्तः ॥

गृह्णन्त्यन्तिकवर्तिनीमिव तलक्षोणीं तटस्था जनाः
प्रासन्न्यादिह पार्थसारथिसुधीवाचां . . ह्रदानामिव ।
. . . . व्याप्रियन्ते जनाः
गाधं ते तु कथंकथंचन पुनर्गृह्णन्ति गाम्भीर्यतः ॥
ईदृशीयमपि शास्त्रदीपिका व्याकृता यदिह साहसान्मया ।
व्यक्तमेतदुपदेशदार्ढ्यतो . . . . : . . . . ॥

R. No. **1781.**

Palm-leaf. 15½ × 1⅜ inches. Foll. 215. Lines, 7 in a page. Grantha. Very much injured.

Presented in 1915-16 by M.R.Ry. N. Vēṅkaṭarāma Śāstri of Vayalūr, Tanjore district.

आत्मतत्त्वपरीक्षा.

ĀTMATATTVAPARĪKṢĀ.

By Bhāskaradīkṣita, son of Mahēśvara of the Cōla country. Same work as that described under R. No. 756 *ante*.

Wants the beginning in the first Prakaraṇa and breaks off in the eighth Prakaraṇa, and many leaves are wanting in the middle.

R. No. **1782.**

Palm-leaf. 17⅛ × 1¼ inches. Foll. 47. Lines, 7 in a page. Grantha. Slightly injured.

Presented in 1915–16 by M.R.Ry. N. Vēṅkaṭarāma Śāstri of Vayalūr, Tanjore district.

प्रायश्चित्तसुबोधिनी.

PRĀYAŚCITTASUBŌDHINĪ.

By Śrīnivāsamakhin of Arhaṅkuḷam. Same work as that described under No. 3492 of the D.C.S. MSS., Vol. VII.

Incomplete.

R. No. **1783.**

Palm-leaf. 18 × 1⅝ inches. Foll. 60. Lines, 8 in a page. Grantha Slightly injured.

Presented in 1915–16 by M.R.Ry. N. Vēṅkaṭarāma Śāstri of Vayalūr, Tanjore district.

अग्निहोत्ररक्षामणिः.

AGNIHŌTRARAKṢĀMAṆIḤ.

By Kāmakōṭidīkṣita, son of Nārāyaṇasōmayājin. Same work as that described under No. 1095 of the D.C.S. MSS., Vol. II.

Breaks off in the fifth Mayūkha.

R. No. **1784.**

Palm-leaf. 19¼ × 1⅞ inches. Foll. 78. Lines, 10 in a page. Telugu. Injured.

Presented in 1915–16 by M.R.Ry. N. Vēṅkaṭarāma Śāstri of Vayalūr, Tanjore district.

(*a*) ब्रह्मतत्त्वसुबोधिनी.

BRAHMATATTVASUBŌDHINĪ.

Foll. 1*a*—18*a*. Fol. 18*b* is left blank.

An exposition of the Advaita school of the Vēdānta: by Kṛṣṇānandayati, disciple of Akhaṇḍānandaśarasvatī. Same work as that described under R. No. 1716(*a*) *ante*, but with a different colophon.

Complete.

Contains the followning Prakaraṇas:—

१. अध्यारोपप्रकरणम्.
२. महावाक्यविवेकप्रकरणम्.
३. दहरविद्योपासनप्रकरणम्.
४. जीवन्मुक्तप्रकरणम्.

Beginning:

(श्रीनारायणपादपद्मनिहितस्वान्तानन्तान् सदा
नानाशास्त्रविशारदाननुदिनं वेदान्तसंस्थापकान् ।
साङ्ख्यादिप्रतिवादिमत्तकरिणां भेदे तु कण्ठीरवान
वन्दे श्रीमदखण्डदेशिकवरान्) वन्दारुमुक्तिप्रदान ॥
श्रीनारायणरूपांस्तानखण्डानन्ददेशिकान् ।
नत्वा विमुक्तये ब्रूमो ब्रह्मतत्त्वसुबोधिनीम् ॥
निर्मलाय प्रशान्ताय भक्तानां मुक्तिदायिने ।
सच्चिदानन्दरूपाय (श्रीरामाय नमो नमः) ॥

लोके तावन्निष्कामनयानेकजन्मकृतसुकृतपरिपाकवशात् परिशुद्धान्तःकरणानां केवलमोक्षमात्रलिप्सूनां बहुग्रन्थावलोकनेष्वलसानां प्रत्यगभिन्नब्रह्मतत्त्वनिरूपणार्थं तावदध्यारोपापवादप्रकारं निरूपयामः । अस्ति हि प्राक् सृष्टेः निरस्तसमस्तप्रपञ्चं स्वप्रकाशचिदेकरसं ब्रह्म ।

End:

अविद्यातिमिरातीतं सर्वाभासविवर्जितम् ।
आनन्दममलं शुद्धं मनोवाचामगोचरम् ॥
वाच्यवाचकनिर्मुक्तं हेयोपादेयवर्जितम् ।
प्रज्ञानघनमानन्दं वैष्णवं पदमश्नुते ॥ इति ॥

नित्यशुद्धमुक्तसत्यपरमानन्दानन्ताद्वयं प्रत्यग्भूतचैतन्यं परं ब्रह्मैवाहमस्मीति यस्तिष्ठति स ब्रह्मैव भवतीति सकलवेदान्तसिद्धान्तः ॥

Colophon:

इति श्रीब्रह्मतत्त्वसुबोधिन्यां जीवन्मुक्तिप्रकरणं समाप्तम् ।

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदखण्डानन्दसरस्वतीपदाब्जसेवापरायणेन श्रीकृष्णानन्दयतिना विरचिता ब्रह्मतत्त्वसुबोधिनी समाप्ता ॥

(*b*) हरिमीडेस्तोत्रम्—हरितत्त्वमुक्तावलीव्याख्यासहितम्.

HARIMĪḌESTŌTRAM WITH THE COMMENTARY HARITATTVAMUKTĀVALĪ.

Foll. 19*a*—44*a*.

The text is by Śaṅkarācārya and the commentary by Svayamprakāśayati. Same work as that described under No. 10476 of the D.C.S. MSS., Vol. XVIII.

Complete.

(*c*) दक्षिणामूर्त्यष्टकम्—तत्त्वसुधाव्याख्यासहितम्.

DAKṢIṆĀMŪRTYAṢṬAKAM WITH THE COMMENTARY TATTVASUDHĀ.

Foll. 44*a*—50*a*.

The text is by Śaṅkarācārya and the commentary by Svayamprakāśayati. Same work as that described under No. 10992 of the D.C.S. MSS., Vol. XIX.

Complete.

(*d*) तैत्तिरीयोपनिषद्दीपिका.

TAITTIRĪYŌPANIṢADDĪPIKĀ.

Foll. 50*a*—69*b*.

By Śaṅkarānanda. Same work as that described under No. 511 of the D C S. MSS , Vol. ı, Part III.

Complete.

Fol. 70 contains a few lines of Bṛhmātmaikatvavidyā.

(*e*) सूतसंहितासारसङ्ग्रहः.

SUTASAṀHITĀSĀRASAṄGRAHAḤ

Foll. 71*a*—75*b*.

This work purports to be a summary of the leading points in the Sūtasaṁhitā, which work is described under No. 2321 of the D.C.S. MSS., Vol. IV, Part I. By a disciple of Paramaśivēndra.

Complete.

Beginning :

(नैमिशे)सुखमासीनं विद्युत्पिङ्गजटाधरम् ।
कराङ्कितचिन्मुद्रं कंचिद्देशिकमाश्रये ॥
विद्यामरन्दनिष्यन्दनन्दच्छिष्यमधुव्रतम् ।
श्रीमत्परमशिवेन्द्रपादपद्ममुपास्महे ॥

नत्वा व्यासमुनिं सूतसंहितायां परात्मनोः ।
. . . . ते मया ॥

शिवमाहात्म्यखण्डे नैमिशीयान् प्रति सूतः—

यस्यापरोक्षविज्ञानमस्ति वेदान्तवाक्यजम् ।
तस्य नास्ति नियोज्यत्वमिति वेदार्थनिर्णयः ॥
वर्णानामाश्रमाः प्रोक्ताः सर्वशास्त्रार्थवेदिभिः ।
तेषां वर्णाश्रमस्थानां वेद . . . . . ॥

* * * *

आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति ॥
आत्मा शुद्धः सदा नित्यः सुखरूपः स्वयम्प्रभुः ।
अज्ञानान्मलिनो भाति ज्ञानाच्छुद्धो विभात्ययम् ॥

End :

ज्ञानलाभाय वेदोक्तप्रकारेण समाहितः ।
महाकारुणिकं साक्षाद्गुरुमेव (समाश्रयेत्) ॥
वक्तव्यं सकलं प्रोक्तं मयातिश्रद्धया सह ।
अतः परं तु वक्तव्यं न पश्यामि मुनीश्वराः ॥
चिन्मुद्रितकरकमलं चिन्तितभक्तेष्टदं विमलम् ।
गुरुवरमाद्यं कञ्चन निरवधिकानन्दनिर्भरं वन्दे ॥

Colophon :

इति श्रीसूतसंहितासारसङ्ग्रहः समाप्तः ॥

Foll. 76*a* to 78*b* contain a few sentences of Ātmānātmavivēka.

R. No. **1785.**

Palm-leaf. 16⅞ × 1⅜ inches. Foll. 116. Lines, 9 in a page. Telugu. Injured.

Presented in 1915–16 by M.R.Ry. N. Vēṅkaṭarāma Śāstri of Vayalūr, Tanjore district.

(*a*) **उत्तरगीताव्याख्या.**

UTTARAGĪTĀVYĀKHYA.

Foll. 1*a*—16*b*. Fol. 17 is left blank.

By Gauḍapādācārya. Same work as that described under Nos. 2377 and 2378 of the D.C.S. MSS., Vol. IV, Part II.

Complete in three Adhyāyas.

(*b*) वेदान्तसूत्रवृत्तिः.
VĒDĀNTASŪTRAVṚTTIḤ.

Foll. 18*a*—52*a*. Fol. 52*b* is left blank.

This work briefly explains the Brahmasūtras in accordance with the Advaita school of the Vēdānta and as interpreted by Śaṅkarācārya in his Brahmasūtrabhāṣya.

Complete.

Beginning:

सूत्रकृद्भाष्यकृद्रूपौ नत्वा हरिहरौ गुरू ।
वेदान्तसूत्रसिद्धान्ततात्पर्यं लिख्यते मया ॥

इह श्रुत्यर्थनिर्णायकानां भगवद्व्याससूत्राणां भाष्यादिष्वर्थालोचनायामतिगहनत्वात् सङ्ग्रहेण तत् ज्ञातुकामानां तत्तत्सूत्रसिद्धान्तार्थः क्रमेण सङ्क्षेपोच्यते— अथातो ब्रह्मजिज्ञासा ।

अथ साधनचतुष्टयसम्पत्त्यनन्तरम्, अतः तथेत्यादिना श्रेयस्साधनानामग्निहोत्रादिकर्मणामनित्यफलत्वश्रवणेन साधनचतुष्टयसम्पत्तेस्संभावितत्वात् । ब्रह्मजिज्ञासा कर्तव्येति । आत्मा वा अरे द्रष्टव्य इत्यादिश्रुत्या ब्रह्मज्ञानायेच्छासाध्यो वेदान्तविचारः कर्तव्य इति ।

End:

अनावृत्तिः शब्दादनावृत्तिः शब्दात् ।

तत्सातिशयं चेदनित्यं स्यात् तथाचेद्विदुषामावृत्तिः प्रसज्येतेति शङ्कायामर्चिरादिना ब्रह्मलोकं प्राप्तानां सगुणविदामनावृत्तिरेव[च], न च पुनरावर्तत इत्यादिक्रममुक्त्यभिधायकशब्दात् । अतस्सगुणविदामपि निर्गुणाश्रयणेनैवानावृत्तिः । सूत्रावृत्तिः शास्त्रसमाप्तिद्योतनार्थेति ॥

Colophon:

इति श्रीवेदान्तसूत्रवृत्तौ चतुर्थाध्यायस्य चतुर्थः पादः ॥

(*c*) ईशावास्योपनिषद्भाष्यम्.
ĪŚĀVĀSYŌPANIṢADBHĀṢYAM.

Foll. 53*a*—58*a*. Fol 58*b* is left blank.

By Śaṅkarācārya. Same work as that described under No. 310 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(*d*) तलवकारोपनिषद्भाष्यम्.

TALAVAKĀRŌPANIṢADBHĀṢYAM.

Foll. 59*a*—69*b*.

By Śaṅkarācārya. Same work as that described under No. 387 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(*e*) काठकोपनिषद्भाष्यम्.

KĀṬHAKŌPANIṢADBHĀṢYAM.

Foll. 70*a*—87*b*.

By Śaṅkarācārya. Same work as that described under No. 342 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(*f*) प्रश्नोपनिषद्भाष्यम्.

PRAŚNŌPANIṢADBHĀṢYAM.

Foll 88*a*—102*b*.

By Śaṅkarācārya. Same work as that described under No. 618 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(*g*) मुण्डकोपनिषद्भाष्यम्.

MUṆḌAKŌPANIṢADBHĀṢYAM.

Foll. 103*a*—114*b*.

By Śaṅkarācārya. Same work as that described under No. 719 of the D.C.S. MSS., Vol. I, Part III.

Complete.

Fol. 115 contains a few sentences of Aitarēyabhāṣya. Fol. 116 is left blank.

R. No. **1786.**

Palm-leaf. 17¼ × 1½ inches. Foll. 55. Lines, 15 in a page. Grantha. Very much injured.

Purchased in 1915-16 from M.R.Ry. N. Vēṅkaṭarāma Śāstri of Vayalūr, Tanjore district.

Foll. 1—10 contain a few passages relating to Māsiśrāddhādiprayōga. Fol. 11 contains a few passages of the first Pāda in the seventh Adhyāya of the Śāstradīpikā. Foll. 12*a*—14*b* contain a few passages of Upādhiviṣaya.

मीमांसानयविवेकः.

MĪMĀṀSĀNAYAVIVĒKAḤ.

Foll. 15a—41a. Fol. 41b is left blank.

By Bhavadēvamiśra. Same work as that described under No. 4457 of the D.C.S. MSS., Vol IX.

Begins in the second Pāda of the first Adhyāya and breaks off in the second Pāda of the second Adhyāya.

Beginning:

(गोपी)कुचतटभूभृत्सेवाहेवाकविपिनकलभेन ।
मकुटलुठत्पिञ्छेन प्रभुणा कृपणा वयं सनाथाः स्मः ॥
त्रिपाद्यामनवद्यं यन्मतं व्यक्तं गुरोः स्वतः ।
विस्तरं सुग्रहं कर्तुं भवः सङ्क्षिप्य वक्ष्यति ॥

आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते । उक्तं कार्यमर्थं प्रतिपादयतो वेदस्य प्रामाण्यमिति मतद्वयेऽपि समानमिदं पूर्वपक्षोत्था(प)नायोक्तम् । चोदनासूत्रे अर्थाद्वा शब्दाद्वा . . . . . त्वेन वेदस्य प्रामाण्यं कार्यार्थतयैवोक्तम् ।

* * * *

Colophon:

इति भवदेवमिश्रविरचिते नयविवेके प्रथमस्याध्यायस्य द्वितीयः पादः ॥

For the end see under No. 4457 referred to above.

Foll. 42 to 55 contain passages of the Anumāna portion.

R. No. **1787.**

Palm-leaf. 16¼ × 1½ inches. Foll. 114. Lines, 10 in a page. Grantha. Much injured.

Purchased in 1915–16 from M.R.Ry. N. Vēṅkaṭarāma Śāstri of Vayalūr, Tanjore district.

रामायणदीपिका.

RAMĀYAṆADĪPIKĀ.

By Vaidyanāthadīkṣita. Same work as that described under No. **119**(a) *ante*.

Contains the Kiṣkindhākāṇḍa incomplete and the Yuddhakāṇḍa without the beginning and the end.

End:

इमां गां भूमिं मया सह आतिष्ठ शाधि । अतिचतुरस्य किं सहायापेक्षेत्यत्राह—तुल्यमिति । पुरस्तान्महाराज्याभिषेकात्पूर्वं भरतेनापीति शेषः । योगं यौवराज्यसम्बन्धम् ।

R. No. **1788.**

Palm-leaf. 16 × 1⅝ inches. Foll. 55. Lines, 9 in a page. Telugu and Grantha. Much injured.

Purchased in 1915-16 from M.R.Ry. N. Vēṅkaṭarāma Śāstri of Vayalūr, Tanjore district.

पूर्वोत्तरमीमांसावादनक्षत्रमालिका.

PŪRVŌTTARAMĪMĀṀSĀVĀDANAKṢATRAMĀLIKĀ.

This MS. contains 14 Vādas; and the author Appayadīkṣita denounces the Mīmāṁsaka school in one to three Vādas, the Naiyāyikas in Vādas four to eight and the Viśiṣṭādvita school of the Vēdānta in the remaining Vādas and supports the Advaita school of the Vēdānta. The names of the Vādas are :—

(१) गुणलक्षणपक्षनिरासवादः.

(२) अरुणैकहायनीसामानाधिकरण्यवादः.

(३) क्रयारुण्यान्वयवादः.

(४) सर्वोपादानत्वहेतुकसर्वशब्दवाच्यत्वसमर्थनवादः.

(५) अयथार्थज्ञानसमर्थनवादः.

(६) स्वप्नायाथार्थ्यवादः.

(७) शुक्तिरजताद्युत्पत्तिसमर्थनवादः.

(८) गौरोऽहमित्यादिप्रतीत्यविषयत्वशङ्कानिरासार्थान्तर्यामिशक्तिवादः.

(९) अहमादिपदविषयान्तर्यामिपर्यन्तत्वाभावशङ्कानिरासार्थान्तर्यामिशक्तिवादः.

(१०) अहमादिपदविषयान्तर्यामित्वपर्यन्तशक्त्यभावप्रयुक्तशङ्कानिरासार्थान्तर्यामिशक्तिवादः.

(११) ब्राह्मणादिशब्ददृष्टान्तप्रसक्तगौरादिशब्दवाच्यत्वशङ्कानिरासार्थान्तर्यामिशक्तिवादः.

(१२) अन्तर्यामिविषयपृथिव्यादिशब्दवाच्यत्वसमर्थनवादः.

(१३) अन्तर्यामिविषयसकलशब्दवाच्यत्वसमर्थनवादः.

(१४) ऐकशास्त्र्यनिराकरणवादः.

Incomplete.

Beginning:

(केचित्तु गुणवचनानां शब्दानां गुणविशिष्टेषु द्रव्येषु शक्तिमभ्युपगम्य तद्विशेषणेषु गुणेषु गौर्नित्या इत्यादिप्रयोगगतानां गवादिशब्दानां गोत्वादिष्विव) लक्षणां वदन्ति । तन्मते शक्तिस्तत्तद्गुणविशिष्टेऽपि न विश्राम्यति; किंतु

तत्तद्गुणविशिष्टशरीरविशिष्टजीवविशिष्टान्तर्यामिणि पर्यवस्यति । तथैव च तैत्तिरीये । अत एव ते स्वर्गकामो यजेत इत्यादिप्रयोगेषु यागाद्यधिकारिसमर्पकाणां स्वर्गकामादिशब्दानामन्तर्यामिणि शक्तावपि क्षुद्रफलाभिलाषेणान्तर्यामिण ईश्वरस्य यागादिप्रवृत्त्यसम्भवात् ।

End:

चोदना पुनरारम्भ इत्यधिकरणे कर्मणां द्वारसद्भावमात्रमुक्तं, न त्वीश्वरप्रसादप्रत्याख्यानेनापूर्वमेव द्वारमिति (समर्थितमिति) तद्विरोधपरिहारलाभात् ।

R. No. **1789.**

Palm-leaf. 14⅜ × 1⅜ inches. Foll. 113. Lines, 8 in a page. Grantha. Much injured.

Presented in 1915-16 by M.R.Ry. N. Vēṅkaṭarāma Śāstri of Vayalūr.

शास्त्रदीपिकाव्याख्या — मयूखावली.

ŚĀSTRADĪPIKĀVYĀKHYĀ : MAYŪKHĀVALĪ.

By Appayadīkṣita. Same work as that described under No. 4510 of the D.C.S. MSS., Vol. IX.

Wants the beginning in the second Pāda of the first Adhyāya and the end in the fourth Pāda of the same Adhyāya.

R. No. **1790.**

Palm-leaf. 14¼ × 1⅓ inches. Foll. 26. Lines, 5 in a page. Grantha. Very much injured.

Purchased in 1915-16 from M.R.Ry. N. Vēṅkaṭarāma Śāstri of Vayalūr.

रामचन्द्रोदयः.

RĀMACANDRŌDAYAḤ.

A poem in seven Kāṇḍas narrating briefly the story of the Rāmāyaṇa up to the coronation of Kuśa and Lava, the twin sons of Rāma: by Rāmadāsa, evidently a follower of Rāmānuja.

Contains all the seven Kāṇḍas, but many leaves are wanting in each Kāṇḍa.

Beginning:

. . . . रामानुजं विभुम् ।
क्रियते रामदासेन रामायणकथाशुभम् ॥

. . . . रम्या चतुरङ्गबलान्विता ।
तस्यां राजा दशरथो वसन् . . . . . ।
. . . . ऋश्यशृङ्गेण धीमता ॥
कारयामास पुत्रेष्टिं पुरुहूतसखो नृपः ।

*   *   *   *

(प्रासूत रामं) कौसल्या भरतं केकयी तदा ।
शत्रुघ्नं लक्ष्मणं चापि सुमित्रा तदनन्तरम् ॥

*   *   *   *

Colophon:

इति (रामदास)विरचिते रामचन्द्रोदये काव्ये बालकाण्डः समाप्तः ॥

End:

. . . . सुवर्णकलशस्थितैः ।
तोयैस्सिंहासनस्थं तमभिषिक्तं पुरोधसा ॥
. . . . दृष्ट्वा सर्वे रामं यशस्विनम् ।
मानयन्तं कपीन् सर्वान् कटकाङ्गददामभिः ॥
. . . . स्सर्वगुणोत्तरम् ।
आचन्द्रार्कमिदं काव्यं वर्धतामुत्तरोत्तरम् ॥

Colophon:

(इति श्रीरामदास)विरचिते रामचन्द्रोदये काव्ये युद्धकाण्डः समाप्तः ॥

*   *   *   *

. . . . जगाम रघुमुख्यसन्निधिम्
लक्ष्मणस्य चरितं निशम्य तत् सोदरो लवणवैरिरञ्जसा ॥
. . . भिषिच्य निजनन्दनौ सुतं लक्ष्मणस्य रघुसूनुरुत्तरे ।
कोसले तदनु दक्षिणे धनं विप्रसादकुरुत . . . . ॥

*   *   *   *

Colophon:

इति रामदासविरचिते रामचन्द्रोदये काव्ये उत्तरकाण्डः समाप्तः ॥

R. No. 1791.

Palm-leaf. 14½ × 1¼ inches. Foll. 183. Lines, 6 in a page. Grantha. Very much injured.

Presented in 1915–16 by M.R.Ry. N. Vēnkaṭarāma Śāstri of Vayalūr, Tanjore district.

तत्त्वचिन्तामणिसारः.

TATTVACINTĀMAṆISĀRAḤ.

By Gōpīnātha. Same work as that described under No. 4030 of the D.C.S. MSS., Vol. VIII.

Wants the beginning and the end in the Pratyakṣakhaṇḍa.

R. No. 1792.

Palm-leaf. 19 × 1¼ inches. Foll. 45. Lines, 8 in a page. Telugu. Slightly injured.

Presented in 1915-16 by M.R.Ry. Śarma of Gaṅgalakurru in the Gōdāvari district.

महाभारतविवरणम्.

MAHĀBHĀRATAVIVARAṆAM.

By Yajñanārāyaṇa. Same work as that described under R. No. 269(*a*) *ante*.

Contains from the Ādiparvan to the Śāntiparvan.

R. No. 1793.

Paper. 12¼ × 4¾ inches. Foll. 39. Lines, 13 in a page. Grantha. Injured.

Purchased in 1915-16 from M.R.Ry. N. Vēṅkaṭarāma Śāstri of Tiruviśanallūr, Tanjore district.

अङ्गत्वनिरुक्तिः.

AṄGATVANIRUKTIḤ.

By Murārimiśra. Same work as that described under R. No. 1351 *ante*, wherein see for the beginning.

Complete.

End :

तथापि विनियोगप्रमाणसहकारित्वादुदाहरणत्वोपपत्तिः। तयोरेव विनियोजकत्वोदाहरणं तु मृग्यमित्यनवद्यं श्रुत्यादिप्रमाणकमङ्गत्वम्।

श्रीजैमिनीयं मतमङ्गतायां तत्तन्निबन्धेष्वपि सन्निबन्धे(द्धम्)।
असुग्रहं सुग्रहमत्र कर्तुं मुरारिरेतामकरोन्निरुक्तिम्॥
मुरारिनिर्मितितन्यायमीमांसावासितात्मनाम्।
तोषाय विदुषामेषा कण्ठभूषा प्रकल्प्यताम्॥

Colophon :

इति श्रीमुरारिविरचिता अङ्गत्वनिरुक्तिस्समाप्तिमगमत्॥

R. No. 1794.

Paper. $14\frac{1}{2} \times 5\frac{3}{4}$ inches. Foll. 62. Lines, 20 in a page. Grantha. Slightly injured.

Presented in 1915-16 by M.R.Ry. N. Vēṅkaṭarāma Śāstri of Tiruviśanallūr, Tanjore district.

मुक्तावलीव्याख्या—प्रभा.

MUKTĀVALĪVYĀKHYĀ : PRABHĀ.

By Rāya Narasiṁha. Same work as that described under No. 3970 of the D.C.S. MSS., Vol. VIII.

Wants the beginning and the end in the Pratyakṣakhaṇḍa.

R. No. 1795.

Paper $12\frac{1}{2} \times 4\frac{1}{4}$ inches. Foll. 55. Lines, 18 in a page. Grantha. Good.

Presented in 1915-16 by M.R.Ry. N. Vēṅkaṭarāma Śāstri of Tiruviśanallūr, Tanjore district.

क्रोडपत्राणि.

KRŌḌAPATRĀṆI.

Contains the Candranārāyaṇa's Krōḍapatra on Jagadīśa's Caturdaśalakṣaṇī, Mathurānātha's Pakṣatā, Candranārāyaṇa's Krōḍapatra on Gadādhara's Sāmānyanirukti, Rājapuruṣavādārtha in the Vyutpattivāda, Śābdabōdhavicāra, Avayavakrōḍa, and Satpratipakṣakrōḍa.

Copied by Rāmasvāmi, in various places such as Harpanahalli, Poona and Satara.

R. No. 1796.

Śrītāla. $8\frac{3}{8} \times 2\frac{1}{8}$ inches. Foll. 138. Lines, 13 in a page. Grantha. Good.

Purchased in 1915-16 from M.R.Ry. N. Vēṅkaṭarāma Śāstri of Tiruviśanallūr, Tanjore district.

(*a*) रामायणमहिमादर्शः.

RĀMĀYAṆAMAHIMĀDARŚAḤ.

Foll. 1*a*—65*b*.

This work discusses certain important controversial points in the Rāmāyaṇa and gives the opinion of the author on those points, which he supports with authoritative quotations. By Purāṇam Hayagrīva Śāstrin.

Contains Bimbas one to seven only as given below :—

१. परमान्नविभागघट्टः.
२. भरतलक्ष्मणयोर्ज्यैष्ठ्यकानिष्ठ्यविचारघट्टः.
३. सीतारामवयोविचारघट्टः.
४. एकपत्नीव्रतत्वनिरूपणघट्टः.
५. चतुर्दशवर्षनिर्णयघट्टः.

६. दुरूहाक्षेपनिकुरुम्बपरिहारघट्टः. | ७. रामायणप्रारम्भपारायणकथा-श्रवणादिनिर्णयप्रकाशघट्टः

Beginning:

वन्दे सुन्दरमिन्दुमन्दु(न्द)रमहं वन्दारुबृन्दारका-
मन्दानन्दकरं सुधाब्धिवपुषं रक्तारविन्देक्षणम् ।
चिन्मुद्रोरुरथाङ्गशङ्खपरमश्रीपुस्तकाञ्चत्करं
शुभ्राब्जासनमश्ववक्त्रमतुलं मत्कार्यसंसिद्धये ॥
वाजीशास्यपदं निधाय हृदये वाल्मीकिवाग्वार्धिज-
श्रीरामायणदिव्यरत्नमहिमादर्शं बुधाह्लादकम् ।
वक्ष्ये निस्तुलसप्तबिम्बघटनासंशोभितार्थास्पदं
श्रीमन्नैगमसङ्गृहीतसकलार्थाक्ष(दर्श)कं स्व(ा)श्रयम् ॥

परमान्नविभागघट्टो नाम प्रथमबिम्बः—

श्रीमद्वाल्मीकिरामायणे बालकाण्डे षोडशसर्गे वाल्मीकिमहर्षिणा परमान्न-विभागश्श्लोकत्रयेण प्रतिपादितः। तद्घट्टीयश्लोका बालकाण्डे—

कौसल्यायै नरपतिः पायसार्धं ददौ तदा ।
अर्धादर्धं ददौ चापि सुमित्रायै नराधिपः ॥
कैकेय्यै चावशिष्टार्धं ददौ पुत्रार्थकारणात् ।
प्रददौ चावशिष्टार्धं पायसस्यामृतोपमम् ॥
अनुचिन्त्य सुमित्रायै पुनरेव महीपतिः ।
एवं तासां ददौ राजा भार्याणां पायसं पृथक् ॥

अत्र कैश्चिद्व्याख्याकर्तृभिरभिवर्णितार्थस्य च श्रीमद्वाल्मीकिरामायणार्थोप-बृंहकवासिष्ठरामायणदौर्वासरामायणाध्यात्मरामायणाद्यनेकग्रन्थप्रतिपादितसाम्प्र-दायिकार्थस्य च तेजस्तिमिरयोरिव परस्परविरोधस्सञ्जाघट(द्य)ते। तत्र कथं वा सिद्धान्त इति विचिकित्सायां सत्यां प्रथमतः पूर्वपक्षमुपपाद्य सप्रमाणकैर्वचनैस्साध-कबाधकनिरूपणपूर्वकतया सिद्धान्तः प्रतिपाद्यते। तथाहि—

दशरथः पुत्रकामेष्टियजनसमये प्राजापत्यपुरुषात्सन्तानप्रदं देवनिर्मितं परमान्नमत्यादरेण परिगृह्य प्रथमतः पायसान्नं द्विधा विभज्यार्धं कौसल्यायै दत्वा तद(न)न्तरमवशिष्टार्धं पुनर्द्विधा विभज्य एकभागं सुमित्रायै दत्वा अवशिष्टैक-भागमपि द्विधा विभज्यांशद्वयेऽपि एकांशं कैकेय्यै दत्वा तदन्तरमवशिष्टमंशं

पुनरपि सुमित्रायै एव ददाविति व्याख्याय एतदभिप्रायोपष्टम्भकतया एतदग्रिम-ग्रन्थे ।

End:

भक्त्या रामस्य ये चेमां संहितामृषिणा कृताम् ।
लेखयन्तीह च नरास्तेषां वासस्त्रिविष्टपे ॥

* * * *

संस्कृतं रामचरितं परित्यज्य नराधमः ।
पठन् भाषान्तरकृतं मृगतृष्णाजलं पिबेत् ॥

किञ्च,

पठन् भाषान्तरकृतं कथं तरति पापधीः ।
क्षुण्णवृत्तिर्भोजनेन विना तत्कथया कथम् ॥

अवशिष्टांशस्तत्रैव द्रष्टव्यः ॥

Colophon:

श्रीमद्वाल्मीकिश्रीमद्धयग्रीवमन्त्रराजोपासनालब्धसंस्कृतप्राकृतवैकृताद्यनेक-भाषाग्रथितनिखिलतन्त्रस्वतन्त्रप्रतिभाभासुरेण पुरा(णं) हयग्रीवशास्त्रिणा विरचित श्रीमद्वाल्मीकिमहर्षिहृदयस्थितपरमार्थप्रकाशके श्रीमद्रामायणमहिमादर्शे श्रीमद्रामायणप्रारम्भणपारायणकथाश्रवणादिनिर्णयप्रकाशघट्टो नाम सप्तमबिम्बः ॥

महागणपतिस्वहस्तलिखितम् ।

(*b*) उमासंहिता.

UMĀSAṀHITĀ.

Foll. 66*a*—126*a*. Foll. 74*b*, 88*b*, 97*b*, 126*b* are left blank.

Same work as that described under No. 2289 of the D.C.S. MSS., Vol. IV, Part I, but wants the introductory stanzas in the beginning.

Breaks off in the Yuddhakāṇḍamāhātmya.

Foll. 127*a*—138*b* contain Rāmāyaṇapūrvapīṭhikā, Vālmīkōtpatti, etc.

R. No. **1797**.

Palm-leaf. 15½ × 1½ inches. Foll. 127. Lines, 9 in a page. Grantha. Good.

Purchased in 1915-16 from M.R.Ry. N. Vēṅkaṭarāma Śāstri of Tiruviśanallūr, Tanjore district.

परिभाषेन्दुशेखरव्याख्या--सर्वमङ्गला.

PARIBHĀṢĒNDUŚĒKHARAVYĀKHYĀ : SARVAMAṄGALĀ.

Same work as that described under No. 1473 of the D.C.S. MSS., Vol. III, but slightly different in the end.

By Śēṣasūri, son of Subrahmaṇyasūri.

Complete.

End:

यद्यपि यथान्यासे पदलाघवम्, शितीत्यादिन्यासे पदगौरवम् । तथापि तदनादृत्य मात्रालाघवस्यैव भाष्यकृता विचारितत्वात् कचिदनाश्रयणमिति भाव इति शिवम् ॥

सिद्धान्ते यदि(ह) प्रमादपतितस्स्यादन्यथाऽस्मत्कृता-
वुक्तं तद्दयया समीक्ष्य सुधियः संशोधयन्तु स्वयम् ।
तोषायैव स मे भवेन्न तु पुना रोषाय शाणक्षतिः
मण्यादेर्वणिजां मुदे न तु पुनः खेदाय बोभूयते ॥ इति ॥

Colophon:

श्रीमदद्वैतविद्यापारावारेण सुब्रह्मण्यसूरितनूजशेषशर्मसूरिविरचिता सर्वमङ्गला समाप्ता ॥

R. No. **1798.**

Palm-leaf. 15⅜ × 1½ inches. Foll. 127. Lines, 8 in a page. Grantha. Slightly injured.

Purchased in 1915-16 from M.R.Ry. N. Vēṅkaṭarāma Śāstri of Tiruviśanallūr, Tanjore district.

शाब्दिकचिन्तामणिः.

ŚĀBDIKACINTĀMAṆIḤ.

By Gōpālakṛṣṇa Śāstrin. Same work as that described under R. Nos. 143 and 1365 *ante*.

Begins with the seventh Āhnika of the first Pāda in the first Adhyāya and breaks off in the ninth Āhnika of the same Pāda of the same Adhyāya.

R. No. 1799.

Palm-leaf. 14⅛ × 1⅜ inches. Foll. 84. Lines, 9 in a page. Grantha. Good.

Purchased in 1915–16 from M.R.Ry. N. Vēṅkaṭarāma Śāstri of Tiruviśanallūr, Tanjore district.

परिभाषेन्दुशेखरव्याख्या—सर्वमङ्गला.

PARIBHĀṢĒNDUŚĒKHARAVYĀKHYĀ : SARVAMAṄGALĀ.

By Śēṣa Śāstri, son of Subrahmaṇyasūri. Same work as that described under No. 1473 of the D.C.S. MSS., Vol. III.

Breaks off in the Grahaṇavatāprātipadikaparibhāṣā, the 31st Paribhāṣā.

R. No. 1800.

Palm-leaf. 14¼ × 1⅝ inches. Foll. 95. Lines, 8 in a page. Grantha. Good.

Fol. 24*b* is left blank.

Presented in 1915–16 by M.R.Ry. N. Vēṅkaṭarāma Śāstri of Tiruviśanallūr, Tanjore district.

सिद्धान्तकौमुदीव्याख्यानम्—बृहच्छब्देन्दुशेखरम्.

SIDDHĀNTAKAUMUDĪVYĀKHYĀNAM : BṚHACCHABDĒNDUŚĒKHARAM

By Nāgōjibhaṭṭa, son of Śivabhaṭṭa and Satī. Same work as that described under No. 1411 of the D.C.S. MSS., Vol. III, wherein see for the beginning.

Begins in the course of the Ṇijantaprakaraṇa and ends with the Lakārārthaprakriyā.

End:

यत्तु कल्पतरुणा क्रियासमभिहार इति सूत्रेण पौनःपुन्ये लोडित्युक्तम्, तच्चिन्त्यम्, द्वित्वापत्तेः । यदि तु पुरीमवस्कन्देत्यत्रावश्यमनुपयोगोऽपेक्षित इति दुराग्रहः, तदा चक इत्यस्य तन्त्रेणोभयान्वयोऽस्त्विति वदन्ति । भ्रम एवेति पुरुषांशे वचनांशे वेति भाव इति सकलेष्टसिद्धिः ॥

Colophon:

इति शिवभट्टसुतसतीगर्भजनागोजिभट्टकृते बृहच्छब्देन्दुशेखरे कौमुदीटीकायां तिङन्तकाण्डं समाप्तम् ॥

R. No. **1801.**

Palm-leaf. 16⅜ × 1⅝ inches. Foll. 44. Lines, 11 in a page. Grantha. Good.

Fol. 28*b* is left blank.

Purchased in 1915–16 from M.R.Ry. N. Vēṅkaṭarāma Śāstri of Tiruviśanallūr, Tanjore district.

चतुर्दशलक्षणीक्रोडपत्रम्.

CATURDAŚALAKṢAṆĪKRŌḌAPATRAM.

Same work as that described under No. 4240 of the D.C.S. MSS., Vol. VIII.

Contains from the beginning of Prathamasvalakṣṇa to the end of Miśralakṣaṇa (11 Lakṣaṇas only).

Complete.

Colophon :

इति गदाधरीयप्रथमस्वलक्षणमारभ्य मिश्रलक्षणपर्यन्तं क्रोडपत्रं लिखितम् ॥

R. No. **1802.**

Palm-leaf. 14¼ × 1 inches. Foll. 36. Lines, 7 in a page. Grantha. Good.

Purchased in 1915–16 from M.R.Ry. N. Vēṅkaṭarāma Śāstri of Tiruviśanallūr, Tanjore district.

अलङ्कारशास्त्रविलासः.

ALAṄKĀRAŚĀSTRAVILĀSAḤ.

Foll. 1*a*—34*b*.

A work on poetics. It criticises the definition and the characteristics of poetry as laid down in Vidyānātha's Pratāparudrīya in the Sāhityadarpaṇa, etc., and attempts to establish the author's view: by Mahāmahōpādhyāya Rāmasubrahmaṇya Śāstrigaḷ of Tiruviśanallūr.

Breaks off in the Uttarālaṅkāra.

Beginning :

आद्यं रामायणा . . . . . न्त्यं तस्य विभूषणम् ।

ध्वनिवृत्त्या रघूत्तंसं वन्दे सीतापतिं महः ॥

न ह्यन्योऽर्हति काव्यानां यशोभाग्राघवादृते ।

इति श्रीमदुत्तररामायणीयचतुर्मुखोक्तौ श्रीरघुनाथान्यस्य विधिशिवादेः कस्यापि श्रीरामायणभारतादिकाव्यनिरूपितध्वनिवृत्त्यपरपर्याययशोभाक्त्वं प्रतिषिध्य श्रीरघुनाथस्यैव तद्भाक्त्वं प्रतिपादितम् । तादृशयशोनिरूपकस्य काव्यस्य

किं लक्षणमिति जिज्ञासायां तन्निरूपणीयमवश्यमिति निश्चित्य शास्त्रग्रन्थरीत्या तन्निरूप्यते । रमणीयार्थप्रतिपादकशब्दत्वं काव्यत्वम् । रमणीयत्वं च लोकोत्तराह्लादजनकज्ञानगोचरत्वम् । लोकोत्तरत्वं चाह्लादगतः चमत्कारत्वापरपर्यायोऽनुभवसाक्षिको जातिविशेषः । पुत्रस्ते जातः धनं ते दास्यामीति वाक्ये आह्लादजनकज्ञानजनकत्वादतिव्याप्तिवारणायाह्लादे लोकोत्तरत्वदलम् । तथाच स्वविशिष्टजनकतावच्छेदकार्थप्रतिपादकतासम्बन्धेन लोकोत्तरचमत्कृतित्ववत्वं काव्यत्वमिति फलितम् । यत्तु प्रतापरुद्रीये विद्यानाथेन अदोषौ सगुणौ सालङ्कारौ शब्दार्थौ काव्यमित्युक्तम्, तन्न ।

* * * *

यत्तु रसवदेव काव्यमिति साहित्यदर्पणोक्तं, तन्न, वस्त्वलङ्कारप्रधानानामकाव्यत्वापत्तेः । तच्च काव्यमुत्तमोत्तमोत्तममध्यमाधमभेदाच्चतुर्विधम् । व्यङ्ग्यार्थगुणभूतवाच्यार्थकशब्दत्वमुत्तमोत्तमकाव्यत्वम् ।

* * * *

Colophon:

श्रीरामसुब्रह्मण्यशास्त्रिविरचिते अलङ्कारशास्त्रविलासे ध्वनिप्रकरणं समाप्तम् ॥

End:

यस्मिन् हिमानां निकरावदाते चन्द्रांशुकैवल्यमिव प्रयाते ।
पुच्छाश्रयाभ्यां विकला इवाद्रौ चरन्ति राकासु चिरं चमर्यः ॥

इत्युदाहरणम् । अत्र चन्द्रिकातः पृथक्त्वेन हिमाद्रिचमरपुच्छयोरदर्शनादुत्प्रेक्षोत्पत्तिरिति तस्यां सामान्यं गुणः ।

सामान्यप्रकरणम् ॥

प्रश्नप्रतिबन्धकज्ञानविषयीभूतमुत्तरम्——किमेकं दैवतमित्यादि प्रश्नानन्तरं जगत्प्रभुं देवदेवमनन्तं पुरुषोत्तममित्यादिभीष्मवाक्यमुदाहरणमिति ॥

Foll. 35 and 36 contain Sannyāsivēdāntaśravaṇaniṣēdhavicāra.

R. No. 1803.

Palm-leaf. 15¾ × 1½ inches. Foll. 133. Lines, 9 in a page. Grantha. Slightly injured.

Purchased in 1915-16 from M.R.Ry. N. Vēṅkaṭarāma Śāstri of Tiruviśanallūr.

Foll. 1—4 contain some private accounts of Gurusvāmi Śāstri. Fol 5*a* contains some witty stanzas, and 5*b* Annasūkta

(*a*) मीमांसान्यायप्रकाशः—आपदेवीयम्.
MĪMĀṀSĀNYĀYAPRAKĀŚAḤ : ĀPADĒVĪYAM.

Foll. 6*a*—34*a*.

By Āpadēva, son of Anantadēva. Same work as that described under No. 4405 of the D.C.S. MSS., Vol IX.

Complete.

Fol. 34*b* contains some sentences relating to Goddess Sarasvatī.

(*b*) तन्त्रसिद्धान्तसङ्ग्रहः.
TANTRASIDDHĀNTASAṄGRAHAḤ.

Foll. 35*a*—70*a*.

A brief treatise containing the principles of the Mīmāṁsā philosophy of Jaimini, by a person who was the disciple of Vāñchēśvara and the son of Rāghavakṛṣṇa. The author is of opinion that Jaimini, having in view salvation as the chief aim of life, inculcates the performance of acts or injunctions as mere sacrifices done to God without any desire as to their fruits.

Complete.

Beginning :

देवः श्रीपार्वतीशः कलयतु कुशलं कान्तचन्द्रार्धचूडः
कन्तोः कायस्य हर्ता गजदनुतनुजोत्कृत्तचर्मोत्तरीयः ।
वीचिव्रातप्रकामप्रविलसदमरख्यातनद्युद्गतिघ्नी
जेजेति स्म यदीया स भवभयहरः कालकालः कृपालुः ॥
लङ्कातङ्कविधायिनं कपिकुलाहङ्कारसन्दायिनं
पङ्काविष्टनृचित्तदूरगमिनं तं कामकायं प्रभुम् ।
क्ष्माङ्काविर्भवशालिमैथिलसुताटङ्काय यो यत्नवान्
तं काकं नयनेन काणमकरोदोङ्कारवाच्यं भजे ॥
नत्वा राघवकृष्णाख्यतातश्रीपदपङ्कजम् ।
बालबोधाय कुर्वेऽहं तन्त्रसिद्धान्तसङ्ग्रहम् ॥
त्रेतोपासननिष्णातान् गीतागङ्गावगाहिनः ।
गुरून् वाञ्छेश्वराभिख्यान् वन्दे वेदादिकोविदान् ॥
दयावारिधिना तेन जैमिन्याख्येन योगिना ।
अथातो धर्मजिज्ञासा कर्तव्येति प्रतिश्रुतम् ॥
फलमुद्दिश्य वेदेन विहितो धर्म इष्यते ।
यथाग्निष्टोमयागादिः स्वर्गाद्यर्थं विधीयते ॥

यजेतादावंशयुगं धातुः प्रत्यय एव च ।
प्रत्ययेऽप्यंशयुगलं लिङ्क्त्वाख्यातत्वभेदतः ॥
तत्राख्यातत्वलिङ्गाभ्यां भावनैवाभिधीयते ।
भवितुर्भवनार्थाय भावुकव्याप्टतिस्तु सा ॥

End:

यो यद्धर्मो यमुद्दिश्य वेदेनात्र विधीयते ।
क्रियमाणस्तमुद्दिश्य तद्धेतुरिति निश्चिनु ॥
श्रीकृष्णार्पणबुद्ध्या तु कृतं चेन्मोक्षसाधनम् ।
अनुष्ठाने तु तद्बुद्ध्या किं मानमिति चेच्छृणु ॥
यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ॥
इत्यादिस्मरणेनैव तथानुष्ठानसाधनात् ।
श्रुतिद्वारा स्मृतिर्मानमिति सर्वं समञ्जसम् ॥
कृष्णं धर्मं चक्षते वेदवाचस्तत्प्रीत्याप्तिस्तद्विचारेण भूयात् ।
एवं मत्वा तद्विचारः कृतोऽस्मिन् तत्सोऽपायात्पातु भक्तार्तिहन्ता ॥

Fol. 70*b* contains the horoscope of the son of Gurusvāmi Śāstri.

(*c*) दृग्दृश्यविवेकः.

DṚGDṚSYAVIVĒKAḤ.

Foll. 71*a*—74*a*.

Same text as that described with commentary under No. 4607 of the D.C.S. MSS., Vol. IX, but with a different stanza at the end and with the colophon as given below.

Complete

End:

एवं विदित्वा परमात्मरूपं गुहाशयं निष्कलमद्वितीयम् ।
समस्तसाक्ष्यं सदसद्विहीनं प्रयाति शुद्धं परमात्मरूपम् ॥

Colophon:

इति श्रीभारतीतीर्थगुरुविरचितदृग्दृश्यविवेकः समाप्तः ॥

Fol. 74 contains nine abridged stanzas of Bhēdadhikkāra.

(*d*) भेदधिक्कारः.

BHĒDADHIKKĀRAḤ.

Foll. 75*a*—87*b*.

By Nṛsiṁhāśramin. Same work as that described under No. 4696 of the D.C.S. MSS., Vol. IX.

Complete.

Fol. 88 contains a note on the work.

(*e*) द्वैतमिथ्यात्वनिर्णयः.

DVAITAMITHYĀTVANIRṆAYAḤ.

Foll. 89*a*—97*b*.

A hostile criticism of the Dvaita Vēdānta. The dualistic theory itself is considered to be an illusion. This work supports the Advaita Vēdānta and lays down the method of getting salvation by self-realization.

Complete.

Begnining :

अद्वैतब्रह्मसाक्षात्कारस्यैव मोक्षहेतुत्वात् मुमुक्षुभिरद्वैतब्रह्मसाक्षात्कारस्सम्पादनीयः । तत्सम्पादनं च द्वैतमिथ्यात्वनिश्चयमन्तरा न संभवति । द्वैतमिथ्यात्व निश्चयश्च स्वपक्षसाधनपरपक्षनिरसनाभ्यां संभवति । तदुभयं च वादजल्प वितण्डानामन्यतमां कथामाश्रित्य सम्पादनीयम् । तत्र विप्रतिपत्तिजन्यसंशयस्य विचाराङ्गत्वादादौ मध्यस्थेन विप्रतिपत्तिः प्रतिपादनीया तत्र मिथ्यात्वे विप्रतिपत्तिः— ब्रह्मप्रमातिरिक्ताबाध्यत्वे सति सत्त्वेन प्रतीत्यर्हं चिद्भिन्नं मिथ्या न वेत्यत्राद्वैतवादिनां प्रयोग. —विमतं मिथ्या दृश्यत्वात् शुक्तिरूप्यवदिति ।

End :

स्वप्ने यत्किञ्चिद्धर्मिणि प्रसक्तयोः गजतद्भावयोरुभयोरपि प्रातिभासिकत्वेन स्वाप्नगजे मिथ्यात्वाश्रये स्वविशेष्यविशेष्यकज्ञानप्रकारीभूतस्वाधिकसत्ताकस्वात्यन्ताभावकत्वाभावेन व्यभिचारस्य वज्रलेपायमानत्वादिति विदांकुर्वन्तु विपश्चितः ॥

(*f*) जिज्ञासाधिकरणविचारः.

JIJÑĀSĀDHIKARAṆAVICĀRAḤ.

Foll. 98*a*—99*b*.

An investigation of the meaning of the first Adhikaraṇa of the Brahmasūtras in accordance with the principles of the Advaita Vēdānta. The necessity for the study of the Brahmasūtras is discussed and explained.

Complete.

Beginning :

इह खलु सकललोकहितैषी भगवान् बादरायणः मुमुक्षूणामनात्मन्येव विवेकेन नित्यशुद्धबुद्धमुक्तप्रत्यगभिन्नाद्वितीयब्रह्मतत्त्वप्रतिपत्तिसम्पत्तये द्विनवत्युत्तरशताधिकरणात्मकं ब्रह्ममीमांसाशास्त्रं रचयाम्बभूव। तस्य च शास्त्रस्येदमादिममधिकरणम्। अधिकरणं नाम विषयविशयपूर्वपक्षसिद्धान्तसङ्गतिरूपपञ्चावयवसमुदायरूपम्।

End :

तादृशनिश्चयासमानकालीनेषु जलवान् ह्रद इत्याकारकनिश्चयेषु तदनङ्गीकाराच्चोक्तरीतेरदृष्टचरत्वाभावादिति निरवद्यं विषयप्रयोजनमत आरम्भणीयं शास्त्रम् ॥

(*g*) मध्वमतविध्वंसनम्.

MADHVAMATAVIDHVAṀSANAM.

Foll. 100*a*—117*a*. Fol. 117*b* is left blank.

This work is a hostile criticism of the Dvaita school of the Vēdānta, and vigorously supports the Advaita school thereof.

Complete.

Beginning :

वक्तारमासाद्य यमेव नित्यं सरस्वती स्वार्थसमन्विता सीत्।
निरस्तदुस्तर्कसमस्तपङ्का नमामि तं शङ्करमर्चिताङ्घ्रिम्
परप्रक्रियया ब्रह्म . . . . भवान्नहि।
घटते विषयाभावादर्थस्यासम्भवादपि ॥
तथा हि वस्तु सन्दिग्धं विचारार्हं न चेतरत्।
मते तव ब्रह्म साक्षिविषयत्वे न गद्यते ॥
साक्षिणो नित्यसिद्धत्वात्सन्देहे हेत्वभावतः।
निश्चयात्मकता तस्य स्वीकृता द्वैतिना त्वया ॥

अत एव साक्षिविषये सुखादावहं सुखी न वेत्यादिसंशयः कदापि न जायत इत्युच्यते। तस्मात् सुखादिभिरसन्दिग्धत्वात् न ब्रह्मणो विचारात्मकशास्त्रविषयत्वम्।

End :

तादृशसर्वज्ञस्य गुरोः पुण्यविशेषाल्लाभे तदा तद्वचनेनैव स्वयोग्यगुणा अपि ज्ञातुं शक्यन्त एवेति किं शास्त्रेण। तस्मात् परीत्या शास्त्रारम्भासम्भवात् निरस्तदुस्तर्कभगवत्पादोक्तरीत्यैव शास्त्रमारम्भणीयमिति सिद्धम् ॥

Colophon :

इति ध्वान्तमतविध्वंसनम् ॥

•(*h*) वाक्यसुधाटीका.

VĀKYASUDHAṬĪKĀ.

Foll. 118*a*—133*a*. Fol. 133*b* is left blank.

Same work as that described under R. No. 1357 *ante*, but with the following differences at the end.

Complete.

एवं सर्वमुपदिश्यैतत्सर्वं प्रकरणार्थं श्रुतिमुखेन सफलमुपसंहरति—

एवं विदित्वा परमात्मरूपं गुहाशयं निष्कलमद्वितीयम् ।
समस्तसाक्षिं सदसद्विहीनं प्रयाति शुद्धं परमात्मरूपम् ॥

Colophon:

इति दृग्दृश्यविवेकाख्यवेदान्तप्रकरणं समाप्तिमगमत् ॥

R. No. **1804.**

Palm-leaf. 19⅝ × 1 inches. Foll. 78. Lines, 7 in a page. Grantha. Good.

Presented in 1915–16 by M.R.Ry. N. Vēṅkaṭarāma Śāstri of Tiruviśanallūr, Tanjore district.

(*a*) व्याकरणपत्राणि.

VYĀKARAṆAPATRĀṆI.

Foll. 1*a*—43*b*.

A critical dissertation explaining the use and significance of certain expressions in the Siddhāntakaumudī.

Incomplete.

Beginning :

ऋच्छत्यताम् । सूत्रे बहुवचननिर्देशात् धातो . . . . हः । नन्वत्र ऋधातोर्गुणविधिर्मास्तु, अभ्यासदीर्घे उत्तरखण्डस्य यणादेशे च रूपासिद्धेरिति चेत् सत्यम् । आरिवनित्यत्र गुणार्थत्वात् । तथाहि--ऋधातोः कसावनेन गुणे रपरत्वे द्वित्वे हलादिःशेषे अभ्यासदीर्घसवर्णदीर्घयोः वस्वेकाजाद्घसामितीट् सिध्यति ।

End :

यदि परादिः अकारलोपः प्रतिषेध्यः । कर्ता हर्ता अतो लोप आर्धधातुक इत्यकारलोपः प्राप्नोति । नैष दोषः । उपदेश इति वर्तते । यद्युपदेश इति व.

Foll. 44—45 contain some domestic accounts.

(*b*) णत्वविचारः

NATVAVICĀRAḤ..

Foll. 46*a* – 53*b*.

Similar to the work described under No. 4837 of the D.C.S. MSS., Vol. X. The arguments here put forth are said to have been used against Śaṅkarabhaṭṭa in the court of the King Kṛṣṇa (probably of Mysore).

Complete

Beginning:

आसीद्विप्रतिपत्तिस्तु णत्वं संज्ञात्वमन्तरा ।
नारायणपदे साधु न वेति नृपसंसदि ॥
तत्र शङ्करभट्टाख्यैः साधुत्वं सुप्रातिश्रुतम् ।
अस्माभिस्तदसाधुत्वं प्रतिज्ञातं सभामुखे ॥
श्रीमत्कृष्णमहीमहेन्द्रसदसि श्रीदेशिकानुग्रहा-
दस्माभिर्यदसाधि णत्वविषये दौर्बल्यमव्याहतम् ।
श्रीनारायणनाम्नि यौगिकतया नीते शिवादौ बला-
त्सोऽयं शङ्करभट्टसंज्ञविदुषा वादि(द)क्रमो लिख्यते ॥

पूर्वपदात्संज्ञायामग इति सूत्रं वार्तिककारस्य मते नियमार्थम् । भगवतो भाष्यकारस्य मते त्वपूर्वविद्य(ध्य)र्थम् । भगवतः सूत्रकारस्याप्ययमेवाभिमतः । अस्मिन् पक्षद्वयेऽपि नारायणशब्दस्य संज्ञाविषयादन्यत्र णत्वं दुरुपपादम् । तथाहि ।

End:

गन्धर्वगानादिशब्देषु अर्शआद्यच्प्रत्यये णत्वापातस्य दुष्परिहरतापातादित्यलं बहुना । तस्मान्नारायणशब्दो महाविष्णुपर एवेति विदांकुर्वन्तु विपश्चितः ॥

(*c*) णत्वदर्पणः.

NATVADARPANAḤ.

Foll. 54*a*—66*b*.

By Śrīnivāsācārya. Same work as that described under No. 4838 of the D.C.S. MSS , Vol. X.

Complete.

Colophon:

श्रीनिवासाचार्यविरचितं णत्वदर्पणं संपूर्णम् ॥

(*d*) वेदान्तपरिभाषा.

VEDĀNTAPARIBHĀṢĀ.

Foll. 67*a*—78*b*.

By Dharmarājādhavarin. Same work as that described under No. 4727 of the D.C.S. MSS., Vol. IX.

Breaks off in the Āgamaparicchēda.

R. No. **1805.**

Palm-leaf. 16 × 1⅝ inches. Foll. 87. Lines. 5 in a page. Grantha. Good.

Purchased in 1915-16 from M.R.Ry. N. Vēṅkaṭarāma Śāstri of Tiruviśanallūr, Tanjore district.

अलङ्कारशास्त्रविलासः.

ALAṄKĀRAŚĀSTRAVILĀSAḤ.

By Mahāmahōpādhyāya Rāmasubrahmaṇya Śāstri. Same work as that described under R. No. 1802 *ante*.

Contains the Arthālaṅkāraprakaraṇa only.

R. No. **1806.**

Palm-leaf. 14⅞ × 1⅝ inches. Foll. 81. Lines, 7 in a page. Grantha. Good.

Purchased in 1915-16 from M.R.Ry. N. Vēṅkaṭarāma Śāstri of Tiruviśanallūr, Tanjore district

Fol. 1 contains Ardhōdayamahōdayanirṇaya.

(*a*) दायसङ्ग्रहः—सव्याख्यः.

DĀYASAṄGRAHAḤ WITH COMMENTARY.

Foll. 2*a*--59*a*. Foll. 6*a* and 59*b* are left blank.

Similar to the work described under R. No. 612(*b*) *ante*.

By Durgayārya *alias* Sindhusvāmin, son of Vāsudēva of Ēkaśakaṭagōtra and Aditi and the daughter's son of Nārāyaṇa. The author lived at Srirangam.

Complete.

Beginning:

स्वेच्छातः स्वयमार्जितेतु विभजेदर्थे स्वभार्यासुता-
नात्मानं च समान् क्रमागतधने पुत्रेच्छयाप्यस्पृहः ।
यद्येकस्तनयः पिता द्विगुणभाक् भार्या निराशा तदा
प्रेतेऽस्मिन्नितरे समा विपितृकाः पौत्राः पितृद्वारतः ॥

अस्यार्थः—

पिता स्वयमार्जितार्थविषये आत्मानं भार्याः पुत्रांश्च स्वेच्छयैव विभजेत् । तत्र वैष्णवं वचनम्—पिता चेत् पुत्रान् विभजेत् तत्र स्वेच्छा तत्स्वयमुपात्तेऽर्थे इति । अत्र पुत्रग्रहणं भार्याणामप्युपलक्षणार्थम् । तासामपि भर्तृधने

सम्बन्धस्य सिद्धत्वात् । तथाचापस्तम्बः—कुटुम्बिनौ धनस्येशाते तयोरनु मतेऽन्येऽपि तद्वित्तेषु वर्तेरन् इति ।

Colophon:

इत्यधोक्षजभृत्येन वासुदेवार्यसूनुना ।
व्याख्यातो दुर्गयेणाद्यः श्लोकोऽयं दायसङ्ग्रहे ॥

End:

अन्धादीनामंशं निर्दोषाः पुत्रा एव अर्हन्ति । पतिताः पतितोत्पन्नाः तद्वंश्याश्च प्रातिलोम्येनोत्पन्नास्तद्वंश्याश्च भागं नार्हन्ति । भर्तव्याश्च न भवन्ति । पतितस्यांशं पतनात् पूर्वमुत्पन्नः पुत्रोऽर्हति । अत्र सन्यासिषु कुटीचकस्तु भर्तव्यो भवतीति ॥

इत्येवं दशमं श्लोकं व्यावृणोद्दायसङ्ग्रहे ।
दुर्गयो रङ्गराजस्य वन्दी नन्दितसज्जनः ॥

Colophon:

इत्येकशकटगोत्रजवासुदेवात्मजसिन्धुस्वाम्यपरपर्यायदुर्गयविरचितायां दायसङ्ग्रहश्लोकदशकव्याख्यायां शुद्धो दशमः परिच्छेदः ॥

Foll. 60—61 contain some passages on the same subject.

(*b*) दत्तचिन्तामणिः.

DATTACINTĀMAṆIḤ.

Foll. 62*a*—79*b*.

A treatise on the Hindu law of adoption: by Vāñchēśvara, a Karṇāṭa Brahmin, son of Nṛsiṁha, grandson of Mādhavārya and the great grandson of Vāñchēśvara who was the author of Mahiṣaśataka and who was born in the line of ministers to the kings of the Bhōsala family who ruled over Tanjore. The author has written other works, viz., Kākatālīyavādārtha, Vidvanmanōhara, Malamāsanirṇaya and commentaries on the Mahiṣaśataka and on the Hiraṇyakēśisūtras. The author salutes in the beginning Iśvara, Śrīnivāsārya and Ahōbala.

Incomplete.

Beginning:

वन्दे . . . महालिङ्गं विश्वेशं मणिकर्णिकाम् ।
ईश्वरश्रीनिवासार्याहोबलाख्यगुरूत्तमान् ॥
श्रीमत्कवेरजातीरं विद्वद्बृन्दोपशोभितम् ।
अत्युत्तमशिवक्षेत्रविष्ण्वादिस्थानमस्ति हि ॥

तत्र तञ्जापुरं नाम राजस्थानमनुत्तमम् ।
राजानः प्रथितास्तत्र भोसलीयान्ववायजाः ॥
तदमात्यकुलोत्पन्नः श्रीमान् वाञ्छेश्वरस्सुधीः ।
माहिषं शतकं चक्रे लोकख्यातमनुत्तमम् ॥
तस्य नप्ता माधवार्यपौत्रः श्रीनरसिंहतः ।
लब्धजन्माधीतशास्त्रो वेदवेदाङ्गपारगः ॥
शिष्टो होशनिकर्णाटजातीयो राजपूजितः ।
श्रीमान् वाञ्छेश्वरश्चक्रे विवृतिं शतकस्य च ॥
हिरण्यकेशिसूत्रस्य कृत्स्नस्य विवृतिं तथा ।
काकतालीयवादार्थं तथा विद्वन्मनोहरम् ॥
निर्णयो मलमासस्य कृतो येनातिदुर्घटः ।
मिताक्षरादिप्राचीनग्रन्थानालोच्य सर्वशः ॥
दत्तचिन्तामणिं कुर्वे दत्तशास्त्रशिखामणिम् ।
दृश्यन्ते बहवो ग्रन्था दत्तानां विषये स्फुटाः ॥
ते युगान्तरदत्तादिकर्तव्यविषया इति ।
कलौ युगे दत्तपुत्रस्वरूपं तु निरूप्यते ॥

सर्वस्य हि पुत्रसम्पत्तिरावश्यकी । तत्र प्रजया हि मनुष्यः पूर्णस्त्रिभिर् ऋणवा जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन ।

* * * *

आत्मा वै पुत्रनामासीति बोधायनादिकल्पसूत्रैरितिहासपुराणादिभिश्च पुत्रसम्पादनं नित्यमन्यथा प्रत्यवायश्रवणात् । तथापि न मुमुक्षोस्तदावश्यकस्तस्य स्वर्गादिकामनाया अभावात् । तस्यात्मज्ञानेन दग्धकर्मबीजतया, कर्मप्राप्यस्वर्गनरकादिप्राप्त्यभावात्तस्य पुत्रा दायमुपयन्ति ।

End :

यत्तु कैश्चिदुक्तम् कृतोद्वाहस्वीकारे गृहीत्रा पुनरपि जातकर्मादीनां कर्तव्यतया उद्वाहितायाः पुनरुद्वाहासंभवात् न कृतोद्वाहस्वीकारो युक्त इति, तन्न,

न होमो न च संस्कारो वाचा दानं विधीयते ।
तस्मात् भ्रातृसपिण्डेषु न होमो न च संस्क्रिया ॥

इति वचनेन सगोत्रे पुनःसंस्काराप्रवृत्तेः । वस्तुतस्तु पुत्रदानेनैव तत्पत्नी-दानस्यार्थसिद्धत्वात् मृषा.

Foll. 80—81 contain information relating to Mahālayaśrāddha.

R. No. **1807**.

Palm-leaf. 15¾ × 1¼ inches. Foll. 25. Lines, 9 in a page. Grantha. Good.

Purchased in 1915–16 from M.R.Ry. N. Vēṅkaṭarāma Śāstri of Tiruviśanallūr, Tanjore district.

ब्रह्मसूत्रविवरणम्.

BRAHAMASŪTRAVIVARAṆAM.

